# PT4/ANNUAL EXAMINATION, 2022-23

## SANSKRIT

**Time – 3 hrs. Class – IX (Set-B) M.M. – 80**

*Name of the student ______________________________ Section ____ Date - 11.02.2023 (Saturday)*

**निर्देश -**

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
- खण्डः (क) अपठित - अवबोधनम् - 10 अङ्काः
- खण्डः (ख) रचनात्मक - कार्यम् - 15 अङ्काः
- खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - 25 अङ्काः
- खण्डः (घ) पठित अवबोधनम् - 30 अङ्काः

(ii) सर्वे प्रश्नाः अनिवार्याः सन्ति ।
(iii) प्रश्नानाम् उत्तराणि खण्डक्रमानुसारं क्रमेणैव लेखनीयानि ।
(iv) उत्तराणि संस्कृतेनैव लेखनीयानि ।
(v) प्रश्नसंख्या अवश्यमेव लेखनीया ।

## खण्ड - क (अपठितावबोधनम् - 10 अङ्काः)

**प्र. 1 अधोलिखितं अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -**

'आतंकवादः आधुनिक-विश्वस्य गुरुतमा समस्या अस्ति । संसारस्य प्रत्येकं देशः आतंकवादेन येन केन प्रकारेण पीडितः अस्ति | आतंकवादः विनाशस्य सा लीला या विश्वम् ग्रसितुं तत्परा अस्ति | आतंकवादेन विश्वस्य अनेकानि क्षेत्राणि रक्तविलिप्तानि सन्ति | आतंकवादेन अनेके निर्दोषाः जनाः प्राणान् अत्यजत् | महिलाः विधवाः जाताः बालाश्च अनाथाः अभवन् | सर्वशक्तिमान् अमेरिकादेशोऽपि अनेन संतप्तः अस्ति | भारतदेशः तु आतंकवादेन अनेकैः वर्षैः पीडितः वर्तते | आतंकवादे तु ते एव जनाः सम्मिलिताः सन्ति ये स्वार्थपूर्तिम् कर्तुम् इच्छन्ति, संसारे च अशान्तेः वातावरणम् द्रष्टुम् काम्यन्ते | शान्तीच्छुकैः देशैः आतंकवादस्य राक्षसस्य विनाशाय मिलित्वा एव प्रयत्नाः समाधेयाः अन्यथा एषा समस्या सुरसामुखमिव प्रतिदिनं वृद्धिम् यास्यति |'

**I. एकपदेन उत्तरत - (1x2=2)**

(i) आतंकवादः कस्य लीला ?
(ii) कः आतंकवादेन अनेकैः वर्षैः पीडितः ?

**II. पूर्णवाक्येन उत्तरत - (2x2=4)**

(i) आतंकवादे कीदृशाः जनाः सम्मिलिताः?
(ii) आतंकवादेन के प्राणान् अत्यजत् ?

**III. यथानिर्देशं उत्तरत - (1x3=3)**

(i) 'विश्वस्य' पदस्य अर्थे अनुच्छेदे कः शब्दः आगतः?
(अ) वर्तते (ब) संसारस्य (स) काम्यन्ते

(ii) 'सर्वशक्तिमान् अमेरिकादेशः' अत्र विशेषणपदं किम् ?
(अ) सर्वशक्तिमान् (ब) अमेरिकादेशः (स) देशः

(iii) 'शान्तेः' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम् ?
(अ) अशान्तिः (ब) लोकस्य (स) अशान्तेः

**IV. अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत | (1)**

## खण्ड - ख (रचनात्मककार्यम् - 15 अङ्काः)

**प्र.2** **भवत्याः नाम लतिका । भवती 'सुरवाणीसन्देशः' इति पत्रिकां पठति । ग्राहकशुल्के समाप्ते सति अग्रिमवर्षार्थं शुल्कप्रेषणाय अत्र लिखिते पत्रे मञ्जूषातः रिक्तस्थानानि पूरयित्वा पत्रं पुनः उत्तरपुस्तिकायां लिखत ।** **(½x10=5)**

८८, आदर्शनगरम्,

नवदेहली-११००३३

दिनांकः ११.०२.२०२३

(1)..............सम्पादकमहोदय !

सादरम् .........(2).........।

अहम् 'सुरवाणीसन्देशः' इति......(3)........नियमिता पाठिका अस्मि । मम......(4)........अस्य वर्षस्य दिसम्बरमासे समाप्तम् भवति । अतः अनेन पत्रेण......(5).......वार्षिकं ग्राहकशुल्कं ११०/- रुप्यकाणि स्टेट बैंक आफ इण्डिया' इति द्वारा.......(6)......बैंक ड्राफ्ट संख्या ४००५६/१४/०२/२०२३ दिनांकितं ..........(7)...........करोमि । कृपया प्राप्तिपत्रं...........(8)..........अनुगृहीतां कुर्वन्तु ।

...........(9)......... ।

........(10)......... संस्कृतोपासिका,

लतिका

| |
|---|
| पत्रिकायाः, सधन्यवादम्, सार्धम्, आदरणीय, संलग्नम्, ग्राहकशुल्कम्, भवदीया, प्रेषयित्वा, वन्दे, प्रदेयम् |

**प्र.3** **मञ्जूषायाः प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतभाषायाम् लिखत -** **(1x5=5)**



| |
|---|
| उपवनस्य, बालकाः, बालिकाः, पुरुषः, पुष्पाणि पश्यन्ति, वृक्षाः, उपनेत्रम, धारितः, शिक्षकः, एतत् चित्रम् |

**अथवा**

**मञ्जूषायां प्रदत्तशब्दानां सहायतया "भारतीय संस्कृतिः" इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत -**

| |
|---|
| अन्तःकरणस्य अलंकरणम्, संस्कृतिः संस्कारेण जायते, भारतीया संस्कृतिः, विश्वे सर्वोच्च स्थानं धारयति, ज्ञानवर्धिका, महापुरुषाणां ऋषीणाञ्च जीवनीशक्तिः, आत्मनः शोभा, जीवनमूल्यस्य रक्षणं, परोपकारिका |

**प्र.4** **अधोलिखितानाम् वाक्यानाम् संस्कृतेन अनुवादं कुरुत ।** **(1x5=5)**

(क) तुम दोनों रामायण पढते हो ।

(ख) राम मोहन के साथ बाजार गया था।

(ग) मैं कल कार द्वारा नागपुर से आऊँगा।

(घ) हमें सदा सत्य बोलना चाहिये।

(ड.) नगर के चारों ओर नदी बहती है।

## खण्ड - ग (अनुप्रयुक्तव्याकरणम् - 25 अङ्काः)

**प्र.5 अधोलिखितवाक्येषु रेखांकितपदानां समुचितं सन्धिं विच्छेदं वा कृत्वा लिखत -** **(1x4=4)**

(i) तत् अन्वेषयामि अपरं <u>मानुष+उचितम्</u> विनोदयितारम् इति।

(ii) यदि गृहमुपैति <u>तदपि</u> वरम्।

(iii) तुण्डेनास्य <u>खग+अधिपः</u>।

(iv) प्रकृतिः <u>समेषां प्राणिनां</u> संरक्षणाय यतते |

**प्र.6 उचितैः शब्दरूपैः प्रदत्तविकल्पेभ्यः चित्वा अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत -** **(1x4=4)**

(i) अहम्....................नमामि |

(अ) विष्णुम् (ब) विष्णोः (स) विष्णवे

(ii) गुरुः ..................आशीर्वादं यच्छति।

(अ) छात्रान् (ब) छात्राणाम् (स) छात्रेभ्यः

(iii) सः..................जलं आनयति |

(अ) जलाशयेन (ब) जलाशयात् (स) जलाशयस्य

(iv) .....................बालकाः तरन्ति।

(अ) नद्याम् (ब) नद्याः (स) नदीम्

**प्र.7 उचितैः धातुरूपैः प्रदत्तविकल्पेभ्यः चित्वा अधोलिखित वाक्येषु रिक्तस्थानानि पूरयत -** **(1x4=4)**

(i) गीता रमा च तत्र ......................|

(अ) पठथः (ब) पठतः (स) पठति

(ii) ह्यः शनिवासरः ........................।

(अ) भविष्यति (ब) आसन् (स) आसीत्

(iii) ते सर्वदा गुरुम् ......................|

(अ) सेवन्ते (ब) सेवते (स) सेवसे

(iv) शुभाः ते पन्थानः .........................|

(अ) अस्तु (ब) अभवत् (स) सन्तु

**प्र.8 अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः चित्वा उचितविभक्तिरूपेण वाक्यानि पूरयत -** **(1x4=4)**

(i) भक्ताः कथयन्ति - ................नमः।

(अ) शारदां (ब) शारदाय (स) शारदायै

(ii) इदं...................अभितः वृक्षाः सन्ति।

(अ) नगरम् (ब) नगरस्य (स) नगरात्

(iii) अलम् मिथ्या.........................।

(अ) भाषणस्य (ब) भाषणात् (स) भाषणेन

(iv) सा बालिका ..................निपुणा अस्ति |

(अ) कलायाम् (ब) कलाम् (स) कले

**प्र.9 प्रदत्तविकल्पेभ्यः चित्वा रेखांकितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा रिक्तस्थानानि पूरयत -** **(1x3=3)**

(i) उपाध्यायस्य मुखं <u>दृश्+तुमुन्</u> नैव इच्छामि ।

(अ) द्रष्टुम् (ब) दृष्ट्वा (स) दृष्टुम

(ii) अहम् बाल्ये विद्यां न <u>अधीतवान्</u> ।

(अ) अधि+इ+शतृ (ब) अधि+इ+क्त (स) अधि+इ+क्तवतु

(iii) न चापि <u>आ+दा+ल्यप्</u> कुशली वैदेहीं मे गमिष्यसि |

(अ) आदेय (ब) आधाय (स) आदाय

**प्र.10 संख्यावाचिरूपाणां उचितं रूपं प्रयुज्य रिक्तस्थानानि पूरयत -** **(1x3=3)**

(i) संस्कृतभाषायां.......(3)..........वचनानि भवन्ति |

(ii) वृक्षे..........(17)..........वानराः तिष्ठन्ति |

(i) अत्र..........(1)...........नदी वहति |

**प्र.11 अधोलिखितेषु पदेषु प्रयुक्तान् उपसर्गान् पृथक्कृत्वा लिखत -** **(1x3=3)**

(i) पराजयः (ii) अनुदानम् (iii) निर्गुणः

## <u>खण्ड - घ (पठितावबोधनम् - 30 अङ्काः)</u>

**प्र.12 अधोलिखितम् गद्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

"प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते । इयं सर्वान् पुष्णाति विविधैः प्रकारैः, तर्पयति च सुखसाधनैः | पृथिवी, जलं, तेजो, वायुः आकाशश्चास्याः प्रमुखानि तत्त्वानि | तान्येव मिलित्वा पृथक्तया वाऽस्माकं पर्यावरणं रचयन्ति | आव्रियते परितः समन्तात् लोकोऽनेनेति पर्यावरणम् | यथा अजातश्शिशुः मातृगर्भे सुरक्षितस्तिष्ठति तथैव मानवः पर्यावरणकुक्षौ | परिष्कृतं प्रदूषणरहितं च पर्यावरणमस्मभ्यं सांसारिकं जीवनसुखं, सद्विचारं, सत्य-संकल्पम् मांगलिकसामग्रीम् च प्रददाति | प्रकृतिकोपैः आतंकितो जनः किम् कर्तुम् प्रभवति? जलप्लावनैः, अग्निभयैः, भूकम्पैः, वात्याचक्रैः, उल्कापातादिभिश्च सन्तप्तस्य मानवस्य क्व मंगलम् |"

**I. एकपदेन उत्तरत -** **(½x2=1)**

(i) प्रकृतिः समेषां प्राणिनां कस्मै यतते?

(ii) मानवः कुत्र सुरक्षितः?

**II. पूर्णवाक्येन उत्तरत -** **(1x2=2)**

(i) प्रकृतेः प्रमुखानि तत्त्वानि कानि सन्ति?

(ii) पर्यावरणम् अस्मभ्यं किम् किम् प्रददाति ?

**III. निर्देशानुसारं उत्तरत -** **(1x2=2)**

(i) 'विनाशनाय' शब्दस्य विपरीतार्थकः शब्दः गद्यांशे कः प्रयुक्तः?

(ii) 'प्रददाति' इति क्रियायाः कर्तृपदं गद्यांशे किम् प्रयुक्तम् ?

**प्र.13 अधोलिखितम् पद्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

"तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे ।
निरीक्ष्य रावणं क्षिप्रं वैदेहीं च ददर्श सः ॥"

**I. एकपदेन उत्तरत -** **(½x2=1)**

क) वैदेहीं कः ददर्श? ख) जटायुः कम् क्षिप्रं ददर्श?

**II. पूर्णवाक्येन उत्तरत -** **(1x2=2)**

क) जटायुः किम् शृणोति ?

ख) कः अवसुप्तः आसीत् ?

**III. निर्देशानुसारं उत्तरत -** **(1x2=2)**

क) 'सीताम्' इति पदस्य किम् पर्यायपदम् अत्र प्रयुक्तम् ?

ख) 'सः रावणं निरीक्ष्य क्षिप्रं वैदेहीं ददर्श' अत्र कर्तृपदं किम् ?

**प्र.14 अधोलिखितम् नाट्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

(ततः प्रविशति तपस्यारतः तपोदत्तः)

**तपोदत्तः** - अहमस्मि तपोदत्तः | बाल्ये पितृचरणैः क्लेश्यमानोऽपि विद्यां नाऽधीतवानस्मि | तस्मात् सर्वैः कुटुम्बिभिः मित्रैः ज्ञातिजनैश्च गर्हितोऽभवम् | (ऊर्ध्वं निःश्वस्य) हा विधे ! किमिदं मया कृतम् ? कीदृशी दुर्बुद्धिरासीत् तदा | एतदपि न चिन्तितं यत् -

"परिधानैरलंकारैर्भूषितोऽपि न शोभते |
नरो निर्मणिभोगीव सभायां यदि वा गृहे ||"

(किञ्चिद् विमृश्य) भवतु, किमेतेन ? दिवसे मार्गभ्रान्तः सन्ध्यां यावत् यदि गृहमुपैति तदपि वरम् | नाऽसौ भ्रान्तो मन्यते | अतोऽहम् इदानीं तपश्चर्यया विद्यामवाप्तुम् प्रवृत्तोऽस्मि |

**I. एकपदेन उत्तरत -** **(½x2=1)**

(i) तपोदत्तः कया विद्यामवाप्तुम् प्रवृत्तोऽस्ति ?

(ii) ततः तपस्यारतः कः प्रविशति ?

**II. पूर्णवाक्येन उत्तरत -** **(1x2=2)**

(i) बाल्ये कः न अधीतवान्?

(ii) कीदृशैः भूषितः अपि न शोभते ?

**III. यथानिर्देशं उत्तरत -** **(1x2=2)**

(i) 'हा विधे! किमिदं मया कृतम् ?' अत्र किं कर्तृपदं प्रयुक्तम् ?

(ii) 'सर्पः' इत्यस्य किं पर्यायपदं अत्र प्रयुक्तम् ?

**प्र.15 रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -** **(1x4=4)**

(i) <u>भवता</u> घृतोत्पत्ति रहस्यं व्याख्यातम्।

(ii) <u>स्वादूनि</u> भक्ष्यकवलानि ते दास्यामि।

(iii) प्रकृतिः <u>जीवनसुखम्</u> प्रददाति।

(iv) खगाधिपः <u>दश</u> बाहून् व्यपाहरत्।

**प्र.16 निम्नलिखितश्लोकस्य अन्वयं मञ्जूषातः समुचितपदं चित्वा पूरयत -** **(1x3=3)**

| सेतुः, ज्ञानं, तपोभिः |
|---|

विना लिप्यक्षरज्ञानं तपोभिरेव केवलम्।
यदि विद्या वशे स्युस्ते सेतुरेष तथा मम॥

**अन्वयः** - यदि विद्या लिप्यक्षर........(i)..........विना केवलं...........(ii).........एव ते वशे स्युः तथा एषः .........(iii)..........मम (स्यात्) ।

**अथवा**

**निम्नलिखितश्लोकं पठित्वा मञ्जूषायाः पदानि चित्वा भावार्थं पूरयत -**

| वाम, पक्षिराजः, जटायोः |
|---|

“जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः ।

वामबाहून्दश तदा व्यपाहरदरिन्दमः ।।“

**भावार्थः -** क्रोधान्धरावणेन.........(i).............प्राणघातकं प्रहारं पश्चात्.........(ii)............ जटायुः चञ्चवा प्रहारं कृत्वा तस्य........(iii).......अङ्गस्य दशबाहून् क्षत-विक्षतण् अकरोत् । शत्रुनाशक खगाधिपस्य पराक्रमः बुद्धिकौशलस्य इदं सुन्दरम् उदाहरणम् अस्ति ।

**प्र.17 घटनाक्रमानुसारं अधोलिखितवाक्यानि क्रमेण पुनः लिखत -** **(½x8=4)**

(i) कुक्कुरः आह- स्वामिनो गृहे रक्षानियोगकरणान्न मया भ्रष्टव्यम् ।

(ii) एते पक्षिणो मानुषेषु नोपगच्छन्ति ।

(iii) मधुकरः द्विस्त्रिरस्याह्वानमेव न मानयामास ।

(iv) न कोऽपि अहमिव वृथा कालक्षेपं सहते ।

(v) अयि चटकपोत ! मानुषस्य मम मित्रं भविष्यसि ।

(vi) भ्रान्तः बालः चिन्तयामास - अहं पुनरात्मानं विनोदयिष्यामि ।

(vii) सः मधुकरं क्रीडाहेतोराह्वयत् ।

(viii) चटकपोतः स्वकर्मव्यग्रः बभूव ।

**प्र.18 अधोलिखितपदेषु पर्यायपदेन सह मेलनं कृत्वा लिखत -** **(1x4=4)**

(i) निदाघे - बाणधरः

(ii) सर्पिः - ग्रीष्मे

(iii) शरी - निन्दितः

(iv) गर्हितः - घृतम्